यथा परस्वे चौराणां यथा जारे कुयोषिताम् ॥
विदुषाञ्च यथा शास्त्रे वाणिज्ये वणिजां यथा ।
तथा शश्वन्मनःकान्ते साध्वीनां योषितां प्रभो !॥
इत्युक्त्वा मनसा देवी पपात स्वामिनः पदे ।
चणं चकार क्रोड़े तां कृपया स कृपानिधिः ॥
नेत्रोदकेन मनसां स्नापयामास तां मुनिः ।
साश्रुणा च मुनेः क्रोड़ं सिषिच भेदकातरा ॥
तदा ज्ञानेन तौ द्वौ च विशोकौ च बभूवतुः ।
स्मारं स्मारं पदाम्भोजं कृष्णस्य परमात्मनः ॥
जगाम तपसे विप्रः स्वकान्तां सुप्रबोध्य च ।
जगाम मनसा शम्भोः कैलासं मन्दिरं गुरोः ॥
पार्व्वती बोधयामास मनसां शोककर्षिताम् ।
शिवश्चातीव ज्ञानेन शिवेन च शिवालये ॥
सुप्रशस्तदिने साध्वी सुषुवे मङ्गलक्षणे ।
नारायणांशं पुत्रञ्च ज्ञानिनां योगिनां गुरुम् ॥
गर्भस्थितो महाज्ञानं श्रुत्वा शङ्करवक्त्रतः ।
स बभूव च योगीन्द्रो योगिनां ज्ञानिनां गुरुः ॥
जातकं कारयामास वाचयामास मङ्गलम् ।
वेदांश्च पाठयामास शिवाय च शिवः शिशोः ॥
रत्नत्रिकोटिलक्षञ्च ब्राह्मणेभ्यो ददौ शिवः ।
पार्व्वती च गवां लक्षं रत्नानि विविधानि च ॥
शम्भुश्च चतुरो वेदान् वेदाङ्गानीतराणि च ।
बालकं पाठयामास ज्ञानं मृत्युञ्जयं परम् ॥
भक्तिरस्ति स्वकान्ते चाभीष्टदेवे गुरौ हरौ ।
यस्याश्च तेन तत्पुत्रो बभूवास्तीक एव च ॥
जगाम तपसे विष्णोः पुष्करं शङ्कराज्ञया ।
संप्राप्य च महामन्त्रं तपश्च परमात्मनः ॥
दिव्यं वर्षत्रिलक्षञ्च तपस्तप्त्वा तपोधनः ।
आजगाम महायोगी नमस्कर्त्तुं शिवं प्रभुम् ॥
शङ्करञ्च नमस्कृत्य स्थित्वा च बालकं पुरः ।
सा चाजगाम मनसा कश्यपस्याश्रमं पितुः ॥
तां सपुत्रां सुतां दृष्ट्वा मुदं प्राप प्रजापतिः ।
शतलक्षञ्च रत्नानां ब्राह्मणेभ्यो ददौ मुने !॥
ब्राह्मणान् भोजयामास सोऽसंख्यान् श्रेयसे शिशोः ।
अदितिश्च दितिश्चान्या मुदं प्रापुः परन्तथा ॥
सा सपुत्रा च सुचिरं तस्थौ तातालये तदा ।
तदीयं पुनराख्यानं वक्ष्यामि तन्निशामय ॥"
तस्या माहात्म्यं यथा,—
"अथाभिमन्युतनये ब्रह्मशापः परीक्षिते ।
बभूव सहसा ब्रह्मन् ! दैवदोषेण कर्म्मणा ॥
सप्ताहे समतीते तु तक्षकस्त्वाञ्च भोक्ष्यति ।
शशाप शृङ्गी नृपतिं कौशिक्याश्च जलेन च ॥
राजा श्रुत्वा तत्प्रवृत्तिं गङ्गाद्वारं जगाम सः ।
तत्र तस्थौ च सप्ताहं शुश्राव धर्म्मसंहिताम् ॥
सप्ताहे समतीते तु गच्छन्तं तक्षकं पथि ।
धन्वन्तरिर्नृपं मोक्तुं ददर्श गामुको नृपम् ॥
तयोर्बभूव संवादः सुप्रीतिश्च परस्परम् ।
धन्वन्तरिर्मणिं प्राप तक्षकः स्वेच्छया ददौ ॥
स ययौ तं गृहीत्वा च तुष्टः प्रहृष्टमानसः ।
तक्षको भक्षयामास नृपञ्च मञ्चकस्थितम् ॥
राजा जगाम वैकुण्ठं स्मारं स्मारं हरिं गुरुम् ।
सत्कारं कारयामास पितुर्जन्मेजयः शुचा ॥
राजा चकार यज्ञञ्च सर्पसत्रं ततो मुने ! ।
प्राणांस्तत्याज सर्पाणां समूहो ब्रह्मतेजसा ॥
स तक्षकश्च भीतश्च महेन्द्रं शरणं ययौ ।
सेन्द्रञ्च तक्षकं हन्तुं विप्रवर्गः समुद्यतः ॥
अथ देवाश्च मुनयश्चाययुर्मनसान्तिकम् ।
तान्तुष्टाव महेन्द्रश्च भयकातरविक्लवः ॥
तत आस्तीक आगत्य यज्ञञ्च मातुराज्ञया ।
महेन्द्रतक्षकप्राणान् ययाचे भूमिपं वरम् ॥
ददौ वरं नृपश्रेष्ठः कृपया ब्राह्मणाज्ञया ।
यज्ञं समाप्य विप्रेभ्यो दक्षिणाञ्च ददौ मुदा ॥
विप्राश्च मुनयो देवा गत्वा च मनसान्तिकम् ।
मनसां पूजयामासुस्तुष्टुवुश्च पृथक् पृथक् ॥
शक्रः सम्भृतसम्भारो भक्तियुक्तः सदा शुचिः ।
मनसां पूजयामास तुष्टाव परमादरम् ॥
दत्त्वा षोड़शोपचारं बलिञ्च तत्प्रियं तदा ।
प्रददौ परितुष्टश्च ब्रह्मविष्णुशिवाज्ञया ॥
संपूज्य मनसादेवीं प्रययुः स्वालयञ्च ते ।
इत्येवं कथितं सर्व्वं किं भूयः श्रोतुमिच्छसि ॥"
इन्द्रकृतमनसापूजास्तोत्रे यथा,—

नारद उवाच ।

"केन तुष्टाव स्तोत्रेण महेन्द्रो मनसां सतीम् ।
पूजाविधिक्रमं तस्याः श्रोतुमिच्छामि तत्त्वतः ॥

श्रीनारायण उवाच ।

सुस्नातः शुचिराचान्तो धृत्वा धौते च वाससी ।
रत्नसिंहासने देवीं वासयामास भक्तितः ॥
स्वर्गगङ्गाजलेनैव रत्नकुम्भस्थितेन च ।
स्नापयामास मनसां महेन्द्रो वेदमन्त्रतः ॥
वाससी वासयामास वह्निशुद्धे मनोहरे ।
सर्व्वाङ्गे चन्दनं दत्त्वा पाद्यार्घ्यं भक्तिसंयुतः ॥
गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम् ।
संपूज्यादौ देवषट्कं पूजयामास तां सतीम् ॥
ॐ ह्रीं श्रीं मनसादेव्यै स्वाहेत्येवञ्च मन्त्रतः ।
दशाक्षरेण मन्त्रेण ददौ सर्व्वं यथोचितम् ॥
दत्त्वा षोड़शोपचारं दुर्लभं दुर्लभां हरिः ।
भक्त्या च पूजयामास ब्रह्मणा प्रेरितो मुदा ॥
वाद्यं नानाप्रकारञ्च वादयामास तत्र वै ।
बभूव पुष्पवृष्टिश्च नभसो मनसोपरि ॥
देवविप्राज्ञया तत्र ब्रह्मविष्णुशिवाज्ञया ।
तुष्टाव साश्रुनेत्रश्च पुलकाञ्चितविग्रहः ॥

महेन्द्र उवाच ।

देवि ! त्वां स्तोतुमिच्छामि साध्वीनां प्रवरां पराम् ।
परात्पराञ्च परमां नहि स्तोतुं क्षमोऽधुना ॥
स्तोत्राणां लक्षणं वेदे स्वभावाख्यानतत्परम् ।
न क्षमः प्रकृतं वक्तुं गुणानां तव सुव्रते ! ॥
शुद्धसत्त्वस्वरूपा त्वं कोपहिंसाविवर्ज्जिता ।
न च शप्तो मुनिस्तेन त्यक्तया च त्वया यतः ॥
त्वं मया पूजिता साध्वी जननी च यथादितिः ।
दयारूपा च भगिनी क्षमारूपा यथा प्रसूः ॥
त्वया मे रक्षिताः प्राणाः पुत्रदाराः सुरेश्वरि ! ।
अहं करोमि त्वां पूज्यां प्रीतिश्च वर्द्धते मम ।
नित्या यद्यपि पूज्या त्वं भवेऽत्र जगदम्बिके ! ।
तथापि तव पूजाञ्च वर्द्धयामि च सर्व्वतः ॥
ये त्वामाषाढ़संक्रान्त्यां पूजयिष्यन्ति भक्तितः ।
पञ्चम्यां मनसाख्यायामीशां त्वां वा दिने दिने ॥
पुत्रपौत्रादयस्तेषां वर्द्धन्ते च धनानि च ।
यशस्विनः कीर्त्तिमन्तो विद्यावन्तो गुणान्विताः ॥
ये त्वां न पूजयिष्यन्ति निन्दन्त्यज्ञानतो जनाः ।
लक्ष्मीहीना भविष्यन्ति तेषां नागभयं सदा ॥
त्वं स्वयं स्वर्गलक्ष्मीश्च वैकुण्ठे कमलालया ।
नारायणांशो भगवान् जरत्कारुर्मुनीश्वरः ॥
तपसा तेजसा त्वाञ्च मनसा सस्रजे पिता ।
अस्माकं रक्षणायैव तेन त्वं मनसाभिधा ॥
मनसा देवितुं शक्ता स्वात्मना सिद्धयोगिनी ।
तेन त्वं मनसादेवी पूजिता वन्दिता भवे ॥
यां भक्त्या मनसा देवाः पूजयन्त्यनिशं भृशम् ।
तेन त्वां मनसां देवीं प्रवदन्ति पुराविदः ॥
सत्त्वरूपा च देवि ! त्वं शश्वत्सत्त्वनिषेवया ।
यो हि यद्भावयेन्नित्यं स तत् प्राप्नोति तत्समः ॥
इन्द्रश्च मनसां ज्ञात्वा गृहीत्वा भगिनीञ्च ताम् ।
प्रजगाम स्वभवनं भूषावासःपरिच्छदाम् ॥
पुत्रेण सार्द्धं सा देवी चिरं तस्थौ पितुर्गृहे ।
भ्रातृभिः पूजिता शश्वन्मान्या वन्द्या च सर्व्वतः ॥
गोलोकात् सुरभी ब्रह्मन् ! तत्रागत्य सुपूजिताम् ।
तां स्नापयित्वा क्षीरेण पूजयामास सादरम् ॥
ज्ञानञ्च कथयामास गोप्यं सर्व्वसुदुर्लभम् ।
तया देवैः पूजिता सा स्वर्लोकञ्च पुनर्ययौ ॥
इदं स्तोत्रं पुण्यबीजं तां संपूज्य च यः पठेत् ।
तस्य नागभयं नास्ति तस्य वंशोद्भवस्य च ॥
विषं भवेत् सुधातुल्यं सिद्धस्तोत्रो यदा भवेत् ।
पञ्चलक्षजपेनैव सिद्धस्तोत्रो भवेन्नरः ।
सर्पशायी भवेत् सोऽपि निश्चितं सर्पवाहनः ॥"

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४६ अध्यायः ॥

धन्वन्तरिकृतमनसाध्यानपूजादि यथा,—

धन्वन्तरिरुवाच ।

"इहागच्छ जगद्गौरि ! गृहाण मम पूजनम् ।
पूज्या त्वं त्रिषु लोकेषु परा कश्यपकन्यके ! ॥
त्वया जितं जगत् सर्व्वं देवि ! विष्णुस्वरूपया ।
तेन तेऽस्त्रप्रयोगश्च न कृतो रणभूमिषु ॥
इत्युक्त्वा संयतो भूत्वा भक्तिनम्रात्मकन्धरः ।
गृहीत्वा शुक्लकुसुमं ध्यानं कर्त्तुं समुद्यतः ॥
चारुचम्पकवर्णाभां सर्व्वाङ्गसुमनोहराम् ।
ईषद्धास्यप्रसन्नास्यां शोभितां सूक्ष्मवाससा ॥
कवरीभारशोभाढ्यां रत्नाभरणभूषिताम् ।
सर्व्वाभयप्रदां देवीं भक्तानुग्रहकातराम् ॥
सर्व्वविद्याप्रदां शान्तां सर्व्वविद्याविशारदाम् ॥
नागेन्द्रवाहिनीं देवीं भजे नागेश्वरीं पराम् ॥
ध्यात्वैवं कुसुमं दत्त्वा नानाद्रव्यसमन्वितम् ।
दत्त्वा षोड़शोपचारं पूजयामास तां प्रिये ! ॥
स्तोत्रञ्चकार भक्त्या च पुलकाञ्चितविग्रहः ।
पुटाञ्जलियुतो भूत्वा भक्तिनम्रात्मकन्धरः ॥*॥